शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
साहित्यदर्पणः षष्ठः परिच्छेदः

किं नाम श्रव्यकाव्यम्? कतिविधञ्चास्य? पद्यस्य स्वरूपं भेदांश्च विशदं विवेचनम्।

'श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा।
छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम्॥
द्वाभ्यां तु युग्मकं सान्दानितकं त्रिभिरिष्यते।
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्॥'

केवलं श्रवणयोग्यं श्रव्यं काव्यम्। तच्च श्रव्यं काव्यं द्विप्रकारकं भवति — पद्यमयं गद्यमयं चेति। तत्र —

छन्दसा बद्धानि = नियन्त्रितानि, पदानि यत्र तथोक्तं काव्यं पद्यम्। तच्च मुक्तेन = समाप्तिबोधक क्रियान्वये पद्यान्तरनिरपेक्षेण एकेन तेन = पद्येन 'मुक्तकम्' ज्ञेयम्। तेनेति अभेदे तृतीया। मुक्तमेव मुक्तकम्, स्वार्थे संज्ञायां वा कन्। एवमग्रेऽपि। समाप्तिबोधकक्रियान्वये परस्परैकवाक्यतापन्नाभ्यां द्वाभ्यां पद्याभ्यां युग्मकं। समाप्तिबोधकक्रियान्वये परस्परैकवाक्यतापन्नैः त्रिभिः पद्यैः सन्दानं = सम्मेलनमस्य सञ्जातमिति सान्दानितकम् इष्यते। अस्यैव अन्यत्र विशेषकम् इति, 'तिलकम्' इति च नामान्तरद्वयम् उपलभ्यते। समाप्तिबोधक क्रियान्वये परस्परैकवाक्यतापन्नैश्चतुर्भिः पद्यैः कलापकं मतं समाप्तिबोधकक्रियान्वये पञ्चभिः ततोऽधिकैर्वा कुलकं मतम्।

उक्तञ्चान्यत्र —

'द्वाभ्यां युग्मकमिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम्।
कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम्॥' इति

उपेन्द्र झा
20/9/20
एसो०प्रो० साहित्य
रा० उ० सं० महावि०
[illegible]

Sep 20, 2020

शास्त्री प्रथम खण्डस्य कृते (पाठ्यक्रम)
अभिज्ञान शाकुन्तलम् नाम नाटकस्य
चतुर्थाङ्कस्य श्लोक व्याख्या ।

"यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥"

प्रस्तुतोऽयं श्लोकः 'पुराकवीनां गणना प्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः' इत्युक्तिदिशा कविमण्डलमण्डनायमानेन अप्रतिम प्रातिभ सम्पत्ति भाजमानेन, कविता वनिता विलासेन महाकविना कालिदासेन विरचितस्य निखिल नाट्यतत्व पूतस्य, काव्यकला समन्वितस्य, सर्वथा नव नवस्य नाट्य साहित्य शिरोरत्नभूतस्य संस्कृत साहित्य नवनीत स्वरूपात् अभिज्ञान शाकुन्तलम् नाम नाटकस्य चतुर्थाङ्कात् गृहीतोऽस्ति ।

श्लोकेऽस्मिन् यदा शकुन्तला पतिगृहं याति तदा तस्याः कृतपुत्रः कश्चिन्मृगशावकः भूयोभूयः शकुन्तलायाः पदान्ते सज्जते । शकुन्तला गतिभङ्गं उपपश्यति यदा 'कः मम वसनान्ते सज्जते' इति पृच्छति तदा कण्वस्तां कथयति —

वत्से ! यस्य कुशसूचि विद्धे मुखे त्वया व्रणविरोपणम् इङ्गुदीनां तैलं न्यषिच्यत श्यामाकमुष्टिपरिवर्धितकः सः अयं ते पुत्रकृतकः मृगः ते पदवीं न जहाति ।

वत्से = पुत्री ! यस्य = मृगशावकस्य कुशानां = दर्भाणां सूचिभिः अग्रभागैः विद्धे मुखे = आनने त्वया = शकुन्तलया व्रणविरोपणे = व्रणनिवारणम्, इङ्गुदीनां तैलद्रव्य विशेषाणां तैलं = स्नेहं न्यषिच्यत = निपतितम् श्यामाकानां = धान्यविशेषाणां मुष्टिभिः = मुष्टिपरिमाणैः परिवर्धितकः = पालितः पोषितश्च सोऽयं ते = तव कृतकपुत्रः मृगः = हरिणशिशुः ते = तव पदवीं मार्गं न जहाति = त्यजति ।

अत्र पदवीपरित्यागाभावं प्रति पूर्ववाक्यानां हेतुत्वात् काव्यलिङ्गमलङ्कारः — हेतोर्वाक्य पदार्थत्वे काव्यलिङ्गं निगद्यते इति लक्षणात् । पालितस्य मृगस्य स्वभावोक्तिरलङ्कारश्चेति तेन सङ्करालङ्कारोऽपि । वसन्ततिलका वृत्तम् - उक्ता वसन्ततिलका तभजा जगौ गः इति लक्षणात् ।

उपेन्द्र झा
20/9/20
एसो० प्रो० साहित्य
रा० उ० सं० महाविद्यालय
मुसलेना, पौड़ी

Sep 20, 2020

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

## अलङ्कार विवेचनम्

### दीपकालङ्कारस्य विवेचनम्

पदार्थानां अप्रस्तुतानां प्रस्तुतानां च सम्मिलितानां यदा एक धर्माऽभिसम्बन्धः स्यात्तदा दीपकं नामालङ्कारो निगद्यते। धर्मश्चात्रापि गुणक्रियाऽन्यतररूप एव। अथवा अनेकासु क्रियासु विद्यमानासु एकमेव कारकं स्यात्तदापि दीपकमेव निगद्यते। उक्तं च साहित्य दर्पणे—

'अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत्॥'

क्रमेणोदाहरणं यथा—

बलावलेपादधुनापि पूर्ववत् प्रबाध्यते तेन जगज्जिगीषुणा।
सतीव योषित्प्रकृतिः सुनिश्चलोऽसौ पुमांसमभ्येति भवान्तरेष्वपि॥'

अत्र प्रस्तुतायाः सुनिश्चलायाः प्रकृतेः अप्रस्तुतायाश्च योषितः एकानुगमनक्रियारूप धर्माभिसम्बन्धाद् दीपकालङ्कारः।

कारकदीपकं यथा—

'दूरं समागतवति त्वयि जीवनाथे
भिन्ना मनोभवशरेण तपस्विनी सा।
उत्तिष्ठति स्वपिति वासगृहं त्वदीयम्
आयाति याति हसति श्वसिति क्षणेन॥'

अत्रैकस्य नायिकाया उत्थानाद्यनेक क्रियाभिसम्बन्धाद् दीपकालङ्कारः। एकस्यैव सर्ववाक्य प्रकाशकत्वेन दीपसाम्याद् दीपकमिति नाम। दीपयति अप्रस्तुतमपि पदार्थं प्रकाशयति (सुन्दरीकरोति) इति व्युत्पत्तिः।

Sep 20, 2020